(॥ऽ॥ चन्द्रः) १० (।ऽ॥ ध्रुवः) ११ (ऽ। ।। धर्मः) १२ (।।।।। शालिकरः) १३ ।

**टगर** पु॰ टः टङ्कनो गर इव । टङ्कनक्षारे (सोहागा) २हेलाविलासविषये ३केकराक्षे च त्रि॰ मेदि॰ ।

**टङ्क** पु॰ टकि—घञ्—अच् वा । १कोपे, २कोषे, ३खड्गे ४पाषाणभेदनेऽस्त्रे च ।५जङ्घायां मेदि॰। ६चतुर्माषक-रूपे परिमाणे वैद्य॰ ७नीलकपित्थे, ८खनित्रे, ९दर्पे च पु॰न॰ हेमच॰ १०परशौ ११राजास्त्रे च शब्दार्थचि॰ ''दार्य्यतां चैव टङ्कौघैः खनित्रैश्च पुरी द्रुतम्'' हरिवं॰ ९॰अ॰ ।''टङ्कैर्मनःशिलगुहेव विदार्य्यमाणा'' मृच्छ॰। ''हिमाद्रिटङ्कादिव भान्ति यस्याम्''भट्टिः। ''रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः'' रघुः । [ सारसुन्दरी।

**टङ्कक** पु॰ टङ्क्यते घञ् सञ्ज्ञायां क । (तङ्का) रजतमुद्रायाम्

**टङ्कपति** पु॰ ६त॰ । रूपकाध्यक्षे (टाँकशालेर अध्यक्ष) सारसुन्दरी । [ स्टङ्के सारसुन्दरी ।

**टङ्कशाला** स्त्री ६त॰ । (टाँकशाल) ख्याते रूप्यकनिर्माण

**टङ्कटीक** पु॰ टङ्क इव टीकते टीक—क । शिवे त्रिका॰ ।

**टङ्कण(न)** न॰ टकि—ल्यु पृषो॰ वा णत्वम् । ( सोहागा ) ख्याते स्वर्णद्रावके १उपरसभेदे । उपरसभेदाश्च भाव॰प्र॰ उक्ता यथा ''गन्धो हिङ्गुलमभ्रतालकशिलाः स्रोतोऽञ्जनं टङ्क(न)णम् । राजावर्त्तकचुम्बकौ स्फटिकया शङ्खः खटी गैरिकम् । कासीसं रसकं कपर्दसिकतावोलाश्च कङ्कुष्ठकम् सौराष्ट्री च मता अमी उपरसाः सूतस्य किञ्चिद्गुणैः'' । ''तद्यथा लवणेन सुवर्णम्'' छा॰ उ॰ भाष्ये ''लवणेन क्षारेण टङ्कणादिना, खरेषु मृदुत्व-करं हि तत्'' भा॰ । ''टङ्कणं वह्निकृद्रूक्षं कफ-वातिकपित्तहृत्'' भावप्र॰ । भावे ल्युट् । (टाँकादेओया पानिदिया झाला)२धातूनां योजनभेदे । दन्त्यान्तः ३अश्व-भेदे पु॰स्त्री ''टङ्कनखरनखरखण्डितहरितालपांशुलेन'' काद॰ मूर्द्धन्यान्तः ४देशभेदे स च देशः वृ॰स॰ १४अ॰ । कूर्मविभागे दक्षिणस्यामुक्तः।''अथ दक्षिणेन लङ्का'' इत्यु-पक्रमे ''कङ्कटटङ्कणवनवासिशिविकफणिकारकोङ्कणा-भीराः'' इत्युक्तेः ।

**टङ्कवत्** पु॰ टङ्क+अस्त्यर्थे मतुप् मस्य वः । १पर्वतभेदे ''टङ्क-वन्तं शिखरिणं वन्दे प्रस्रवणं गिरिम्'' रामा॰२।५५अ॰ ।

**टङ्का** स्त्री टकि—अच् । १जङ्घायां मेदि॰ । २तारादेव्यां टङ्कारकारिणीशब्दे दृश्यम् ।

**टङ्कानक** पु॰ टङ्कं कोपमानयति उद्दीपयति अन—णिच् खुल् । १श्लेष्मान्तकवृक्षे (वामनगाछा) शब्दच॰ ।

**टङ्कार** पु॰ टमित्यव्यक्तशब्दस्य कारः कृ—घञ् । १ध्वनिभेदे धनुर्ज्याकर्षणजे शब्दे २विस्मयहेतुके शब्दे च ।३शिञ्जिनी-ध्वनौ प्रसिद्धे च मेदि॰ । कृ—णिनि । टङ्कारिन् १टङ्कारयुक्ते त्रि॰ स्त्रियां ङीप् सा च २तारादेव्याम् टङ्कारकारिणीशब्दे दृश्यम् ।

**टङ्कारकारिणी** स्त्री॰कृ—णिनि ङीप् ६त॰। तारादेव्याम्''ट-ङ्कारकारिणी टीका टङ्का टङ्कारिणी तथा तारासहस्रनाम।

**टङ्कारी** दु॰ स्त्री टङ्कमृच्छति ऋ—अण् गौरा॰ । (टकारी) वृक्षभेदे''टङ्कारी वातश्लेष्मघ्नी शोफोदररुजापहा । तिक्ता च दीपनी लघ्वी भिषग्भिः परिकीर्त्तिता'' राजनि॰ ।

**टङ्ग** पु॰न॰ टङ्क+पृषो॰ । १खनित्रे (टाँगि) २परशुभेदे च ३जङ्घायां मेदि॰ । (सोहागा) ४टङ्कने शब्दच॰।५चतु-र्माषकमाने वैद्य॰ ।

**टङ्गण** पु॰न॰ टङ्कण+पृषो॰ (सोहागा) टङ्कणे ।

**टङ्गिनी** स्त्री टकि—णिनि पृषो॰ । (आकनादी) पाठायाम् । शब्दच॰ । [ज्येष्ठ्याम् त्रिका॰ ।

**टट्टनी** स्त्री टट्टेति शब्दं नयति नी—ड गौरा॰ ङीष् ।

**टट्टरी** स्त्रीटट्टेति शब्दं राति रा—क गौरा॰ ङीष् १पटह-वाद्ये २लम्पावाद्ये ३मृषावादे च मेदि॰ ।

**टट्टर** पु॰ भेरीशब्दे हेमच॰ ।

**टल** विप्लवे (टला) भ्वा॰ पर॰ अक॰ सेट् । टलति अटा-लीत् टटाल टेलतुः । ज्वला॰ टलः टालः ।

**टवर्ग** पु॰ ट+प्रातिशाख्योक्तः वर्गप्रत्ययः । ट ठ ड ढ ण रूपेषु वर्णेषु । ततो भवार्थे छ । टवर्गीय टादौ वर्णे ।

**टा** स्त्री टल—ड । पृथिव्याम् एकाक्षरकोषः ।

**टाङ्क** न॰ टङ्केन तद्रसेन निर्वृत्तम् । टङ्करूपनीलकपित्थ-रसेन निर्वृत्ते मद्यभेदे । ''पानसं द्राक्षमाधूकं खार्जुरं तालमैक्षवम् । माध्वीकं टाङ्कं माद्वीकमैरेयं नारिके-लजम् । सामान्यानि द्विजातीनां मद्यान्येकादशैव च । द्वादशन्तु सुरा मद्यं सर्वेषामधमं स्मृतम्'' । पुलस्त्येन तत्पानं निषिद्धम् । अस्त्रयत इति आसवो मद्यानाम-वस्थाविशेषः सद्यःकृतसन्धानेन सञ्जातमद्यभावः यम-धिकृत्य इदं पुलस्त्योक्तं प्रायश्चित्तम् । ''द्राक्षेक्षुटङ्क-खर्जूरपनसादेश्च यो रसः । सद्योजातन्तु पीत्वा तं त्र्यहाच्छुध्येद् द्विजोत्तमः'' ।[नागवीटे वृक्षभेदे त्रिका॰ ।

**टाङ्कर** पु॰टाङ्कं तत्तुल्यरसं राति रा—क टाङ्क+कुञ्जा॰ र वा ।

**टार** पुं स्त्री॰ टां पृथ्वीमृच्छति ऋ—अण् उप॰ स॰ । घोटके